नवग्रहपीडाहरस्तोत्रम्

{॥ नवग्रहपीडाहरस्तोत्रम् ॥}

ग्रहाणामादिरादित्यो लोकरक्षणकारकः ।

विषमस्थानसंभूतां पीडां हरतु मे रविः ॥ १॥

रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः ।

विषमस्थानसंभूतां पीडां हरतु मे विधुः ॥ २॥

भूमिपुत्रो महातेजा जगतां भयकृत् सदा ।

वृष्टिकृद्वृष्टिहर्ता च पीडां हरतु मे कुजः ॥ ३॥

उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः ।

सूर्यप्रियकरो विद्वान् पीडां हरतु मे बुधः ॥ ४॥

देवमन्त्री विशालाक्षः सदा लोकहिते रतः ।

अनेकशिष्यसम्पूर्णः पीडां हरतु मे गुरुः ॥ ५॥

दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः ।

प्रभुस्ताराग्रहाणां च पीडां हरतु मे भृगुः ॥ ६॥

सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः ।

मन्दचारः प्रसन्नात्मा पीडां हरतु मे शनिः ॥ ७॥

महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाबलः ।

अतनुश्चोर्ध्वकेशश्च पीडां हरतु मे शिखी ॥ ८॥

अनेकरूपवर्णैश्च शतशोऽथ सहस्रशः ।

उत्पातरूपो जगतां पीडां हरतु मे तमः ॥ ९॥

॥ इति ब्रह्माण्डपुराणोक्तं नवग्रहपीडाहरस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Kirk Wortman kirkwort at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Navagraha Peeda Hara Stotram Lyrics in Devanagari PDF
% File name : navagrahapIDAharastotram.itx
% Category : navagraha
% Location : doc_z_misc_navagraha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Kirk Wortman kirkwort at hotmail.com
% Proofread by : Kirk Wortman kirkwort at hotmail.com
% Latest update : August 24, 2006, July 2 2011
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%

% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website